
1075CH10

# 10


# समयः

**छात्रा: एतानि उदाहरणानि पश्यन्तु —**


- अधुना दशवादनं संवृत्तम्।
- सार्धदशवादने अहं बहि: गच्छामि
- इदानीं रात्रे: नववादनम्।
- पादोनदशवादने शय्यां गच्छामि।
- माता — पुत्र! षड्वादनं जातम्!
- पुत्र — आम् मात:। उत्तिष्ठामि। मया तु सार्धसप्तवादने विद्यालयं प्रति गन्तव्यम् अस्ति।
- सम्प्रति अष्टवादनं जातम्।
- एकादशवादने मित्रम् आगच्छति।




द्वादशवादनम्



दशवादनम्




सपादसप्तवादनम्



पादोनपञ्चवादनम्

© NCERT not to be republished




सार्धनववादनम्

**अभ्यास:**

**1. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत–**
**उदाहरणम् —**

द्वितलीयरेलवाहनं .................................. (10:15) वादने जयपुरं प्राप्नोति।

द्वितलीयरेलवाहनं सपाददशवादने जयपुरं प्राप्नोति।

(i) पुरुषोत्तम-एक्सप्रेस इति रेलयानं .................................. (9:30) वादने पुरीत: प्रस्थानं करोति।

(ii) चेतक-एक्सप्रेस इति रेलयानं .................................. (4:45) वादने दिल्लीम् आगच्छति।

(iii) हावड़ा-एक्सप्रेस .................................. (11:00) वादने हावड़ास्थानकं प्राप्नोति।

(iv) रेलयानमेकं .................................. (8:15) उत्तराञ्चलं प्रति गच्छति।

**2. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत–**
**उदाहरणम् —**

माता प्रात: ..................................(5:00) वादने उत्तिष्ठति।

माता प्रात: पञ्चवादने उत्तिष्ठति।

(i) राहुल: प्रातर्भ्रमणाय .................................. (6:15) वादने उद्यानं गच्छति।

(ii) मल्लिका .................................. (7:30) वादने प्रातराशं करोति।

(iii) अनन्या .................................. (5:45) वादने क्रीडति।

(iv) सर्वे .................................. (10:00) वादने शयनं कुर्वन्ति॥

3. **अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**

**उदाहरणम्—**

प्रात: ..................... (7:00) वादनत: ..................... (7:45) वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

प्रात: सप्तवादनत: पादोनाष्टवादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

(i) ..................... (8:15) वादनत: ..................... (9:00) वादनपर्यन्तं विज्ञानविषयस्य कालांश: भवति।

(ii) वयं ..................... (9:00) वादनत: ..................... (9:45) वादनपर्यन्तं गणितविषयं पठाम:।

(iii) ..................... (2:45) वादनत: ..................... (3:30) वादनपर्यन्तं हिन्दीभाषाकालांश: भवति।।

(iv) संस्कृतशिक्षक: ..................... (10:15) वादने अध्यापयति।

4. **अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**

**उदाहरणम्—**

छात्र: .....................(5:00) वादने उत्तिष्ठति .....................(6:15) वादने व्यायामं करोति।

छात्र: पञ्चवादने उत्तिष्ठति सपादषड्वादने व्यायामं करोति।

(i) छात्र: .....................(7:30) वादने प्रातराशं कृत्वा .....................(9:45) वादने विद्यालयं गच्छति।

(ii) ..................... (4:00) वादने गृहमागत्य ..................... (4:30) वादनपर्यन्तं विश्रामं करोति।

(iii) ..................... (5:00) वादने भोजनं कृत्वा ..................... (9:30) वादनपर्यन्तम् अध्ययनं करोति।

(iv) रात्रौ ..................... (9:45) वादनत: ..................... (5:00) वादनपर्यन्तं शयनं करोति।

© NCERT not to be republished